हर हर शङ्कर जय जय शङ्कर

ॐ

     

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# अमृतसिद्धियोग-देवी-पारायणम्

Announcement regarding parayanam to be done on days of Amritasiddhi Yoga as directed by Jagadguru Shri Kanchi Kamakoti Peetadhipati Shri Shankara Vijayendra Sarasvati Shankaracharya Swamigal

Time is the basis of all actions. As is well known, actions executed at the proper time bear more fruit.

In the cyclic rotation of time, along with the bad combinations of grahas and nakshatras that indicate the probability of upcoming difficulties, good combinations that grant benefits in multiples also arise. The sages who know this subtle nature of time have done us immeasurable anugraham by telling us about this via shastram. They have shown the way to protect ourselves for times when difficulties may arise, and to attain happiness by making efforts to do good deeds in beneficial times.

Among such good combinations are the Amrita Siddhi yogas of certain weekdays and nakshatras. They are Sunday-Hasta, Monday-Mrigashirsha,

Tuesday-Ashvini, Wednesday-Anuradha, Thursday-Pushya, Friday-Revati, Saturday-Rohini.

आदित्यहस्ते गुरुपुष्ययोगे बुधानुराधा शनिरोहिणी च।
सोमे च सौम्यं भृगुरेवती च भौमाश्विनी चामृतसिद्धियोगाः॥

As per the reading सोमश्रवण्याम् in the same verse, Monday-Shravana is also praised as a special yoga. Good deeds performed on such yogas become especially strong in protecting and nourishing us.

For instance, in Devi Atharvashirsha, it is said भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति, that is, one can cross even a gruesome death by doing parayanam when Tuesday and Ashvini join.

Therefore on these potent days, Shri Acharya Swamigal instructs to perform the following Devi-related parayanas as per achara and tradition and achieve both loka kshemam and one's own kshemam.

- Do parayana of all texts given below as far as possible.
- If unable to do on a single day, it may be done by starting or finishing on the day with Amrita Siddhi yoga.
- This is to be done after completing snanam, sandhyavandanam and other nitya karmanushthanam.

Texts for parayanam

1. Durga Saptashati
2. Lalita Sahasranamam
3. Saundarya Lahari
4. Durga Stuti from Virata Parva of Mahabharata (see appendix)
5. Durga Chandrakala Stuti of Appayya Dikshitar (see appendix)
6. Durga Stuti from Bhishma Parva of Mahabharata (see appendix)
7. Durga Pancharatnam, composed by Shri Chandrashekharendra Sarasvati

Shankaracharya Swamigal, 68th Acharya of our Shri Kanchi Kamakoti Moolamnaya Sarvajna Peetam (see appendix)
8. Mahishasura Mardini Stotram
9. Abhirami Anthathi (Tamil)

Naivedyam: Dadhi-annam (curd rice)
Please do the parayanam with sankalpam as given below and receive the Grace of Guru and Devi.

## ॥ सङ्कल्पः ॥

ममोपात्त + प्रीत्यर्थं भगवत्याः जगदम्बायाः प्रसादेन -

- जनानां दुर्विचार-निवृत्ति-पूर्वक-सद्विचार-अभिवृद्ध्यर्थं,
- साधूनां धार्मिकाणां च धैर्य-विश्वास-पुष्टि-सिद्ध्यर्थम्, आधर्मिक-शक्तीनां विनाशार्थं,
- तद्-द्वारा सर्व-लोक-क्षेमार्थं
- भारतीयानां महा-जनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्-कार्येभ्यः निवृत्त्यर्थं
- भारतीयानां सन्ततेः सनातन-सम्प्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुम्बानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

[दुर्गा-सप्त-शती-/ललिता-सहस्रनाम-/सौन्दर्य-लहरी-/युधिष्ठिरकृतदुर्गा-स्तुति-/अर्जुनकृतदुर्गास्तुति-/दुर्गाचन्द्रकलास्तुति-/महिषासुरमर्दिनीस्तोत्र-/अभिराम्यन्तादि]स्तोत्र-पारायणं करिष्ये ।

❁

# विश्वावसु-संवत्सर-अमृत-सिद्धि-योग-दिनानि

| | | |
|---|---|---|
| २०२५-०४-१६ | Wed | बुधानुराधा-योगः (पूर्णम् अहः) |
| २०२५-०४-२१ | Mon | सोमश्रवण-योगः १२:३६▶ |
| २०२५-०५-१४ | Wed | बुधानुराधा-योगः▶११:४५ |
| २०२५-०५-१९ | Mon | सोमश्रवण-योगः (पूर्णम् अहः) |
| २०२५-०५-२३ | Fri | भृगुरेवती-योगः १६:०१▶ |
| २०२५-०६-२० | Fri | भृगुरेवती-योगः (पूर्णम् अहः) |
| २०२५-०७-२१ | Mon | सोममृगशीर्ष-योगः २१:०५▶ |
| २०२५-०७-२४ | Thu | गुरुपुष्य-योगः १६:४२▶ |
| २०२५-०८-१८ | Mon | सोममृगशीर्ष-योगः (पूर्णम् अहः) |
| २०२५-०८-२१ | Thu | गुरुपुष्य-योगः (पूर्णम् अहः) |
| २०२५-०९-१३ | Sat | शनिरोहिणी-योगः १०:०९▶ |
| २०२५-०९-१५ | Mon | सोममृगशीर्ष-योगः▶०७:२९ |
| २०२५-०९-१८ | Thu | गुरुपुष्य-योगः▶०६:३० |
| २०२५-१०-११ | Sat | शनिरोहिणी-योगः▶१५:१८ |
| २०२५-१०-१९ | Sun | आदित्यहस्त-योगः १७:४७▶ |
| २०२५-११-०४ | Tue | भौमाश्विनी-योगः १२:३२▶ |
| २०२५-११-१६ | Sun | आदित्यहस्त-योगः (पूर्णम् अहः) |
| २०२५-१२-०२ | Tue | भौमाश्विनी-योगः (पूर्णम् अहः) |
| २०२५-१२-१४ | Sun | आदित्यहस्त-योगः▶०८:१६ |
| २०२५-१२-१७ | Wed | बुधानुराधा-योगः १७:०९▶ |
| २०२६-०१-१४ | Wed | बुधानुराधा-योगः (पूर्णम् अहः) |
| २०२६-०१-१९ | Mon | सोमश्रवण-योगः ११:५०▶ |
| २०२६-०२-११ | Wed | बुधानुराधा-योगः▶१०:५१ |

| | | |
|---|---|---|
| २०२६-०२-१६ | Mon | सोमश्रवण-योगः (पूर्णम् अहः) |
| २०२६-०२-२० | Fri | भृगुरेवती-योगः २०:०६▸ |
| २०२६-०३-२० | Fri | भृगुरेवती-योगः (पूर्णम् अहः) |

# ॥ युधिष्ठिर-कृत-दुर्गा-स्तुतिः ॥

## वैशम्पायन उवाच

विराट-नगरं रम्यं गच्छमानो युधिष्ठिरः।
अस्तुव·न्मनसा देवीं दुर्गां त्रि-भुवने·श्वरीम्॥ १ ॥

यशोदा-गर्भ-सम्भूतां नारायण-वर-प्रियाम्।
नन्द-गोप-कुले जातां मङ्गल्यां कुल-वर्धनीम्॥ २ ॥

कंस-विद्रावण-करी·मसुराणां क्षयं-करीम्।
शिला-तट-विनिक्षिप्ता·माकाशं प्रति गामिनीम्॥ ३ ॥

वासुदेवस्य भगिनीं दिव्य-माल्य-विभूषिताम्।
दिव्या·म्बर-धरां देवीं खड्ग-खेटक-धारिणीम्॥ ४ ॥

भारा·वतरणे पुण्ये ये स्मरन्ति सदा शिवाम्।
तान् वै तारयसे पापात् पङ्के गा·मिव दुर्बलाम्॥ ५ ॥

स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्र-सम्भवैः।
आमन्त्र्य दर्शना·काङ्क्षी राजा देवीं सहा·नुजः॥ ६ ॥

नमोऽस्तु वरदे कृष्णे कुमारि ब्रह्म-चारिणि।
बाला·र्क-सदृशा·कारे पूर्ण-चन्द्र-निभा·नने॥ ७ ॥

चतु·र्भुजे चतु·र्वक्त्रे पीन-श्रोणि-पयो·धरे।
मयूर-पिच्छ-वलये केयूरा·ङ्गद-धारिणि॥ ८ ॥

भासि देवि यथा पद्मा नारायण-परिग्रहः।
स्वरूपं ब्रह्मचर्यं च विशदं तव खे-चरि॥ ९ ॥

कृष्ण-च्छवि-समा कृष्णा सङ्कर्षण-समा·नना।
बिभ्रती विपुलौ बाहू शक्र-ध्वज-समुच्छ्रयौ॥ १० ॥

पात्री च पङ्कजी घण्टी स्त्री विशुद्धा च या भुवि।
पाशं धनु·र्महाचक्रं विविधा·न्यायुधानि च॥ ११॥

कुण्डलाभ्यां सुपूर्णाभ्यां कर्णाभ्यां च विभूषिता।
चन्द्र-विस्पर्धिना देवि मुखेन त्वं विराजसे॥ १२॥

मुकुटेन विचित्रेण केश-बन्धेन शोभिना।
भुजङ्गा·भोग-वासेन श्रोणि-सूत्रेण राजता॥ १३॥

विभ्राजसे चा·बद्धेन भोगेने·वे·ह मन्दरः।
ध्वजेन शिखि-पिच्छाना·मुच्छ्रितेन विराजसे॥ १४॥

कौमारं व्रत·मास्थाय त्रि-दिवं पावितं त्वया।
तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च॥ १५॥

त्रैलोक्य-रक्षणा·र्थाय महिषा·सुर-नाशिनि।
प्रसन्ना मे सुर-श्रेष्ठे दयां कुरु शिवा भव॥ १६॥

जया त्वं विजया चैव सङ्ग्रामे च जय-प्रदा।
ममा·पि विजयं देहि वर-दा त्वं च साम्प्रतम्॥ १७॥

विन्ध्ये चैव नग-श्रेष्ठे तव स्थानं हि शाश्वतम्।
कालि कालि महा-कालि शीधु-मांस-पशु-प्रिये॥ १८॥

कृता·नुयात्रा भूतै·स्त्वं वर-दा काम-चारिणी।
भारा·वतारे ये च त्वां संस्मरिष्यन्ति मानवाः॥ १९॥

प्रणमन्ति च ये त्वां हि प्रभाते तु नरा भुवि।
न तेषां दुर्लभं किं-चित् पुत्रतो धनतोऽपि वा॥ २०॥

दुर्गात् तारयसे दुर्गे तत् त्वं दुर्गा स्मृता जनैः।
कान्तारे·ष्ववसन्नानां मग्नानां च महा·र्णवे।
दस्युभि·र्वा निरुद्धानां त्वं गतिः परमा नृणाम्॥ २१॥

जल-प्रतरणे चैव कान्तारे·ष्वटवीषु च।
ये स्मरन्ति महादेवि न च सीदन्ति ते नराः ॥ २२ ॥

त्वं कीर्तिः श्री·र्धृतिः सिद्धि·र्ह्री·र्विद्या सन्तति·र्मतिः।
सन्ध्या रात्रिः प्रभा निद्रा ज्योत्स्ना कान्तिः क्षमा दया ॥ २३ ॥

नृणां च बन्धनं मोहं पुत्र-नाशं धन-क्षयम्।
व्याधिं मृत्युं भयं चैव पूजिता नाशयिष्यसि ॥ २४ ॥

सोऽहं राज्यात् परिभ्रष्टः शरणं त्वां प्रपन्नवान्।
प्रणत·श्च यथा मूर्ध्ना तव देवि सुरे·श्वरि ॥ २५ ॥

त्राहि मां पद्म-पत्रा·क्षि सत्ये सत्या भवस्व नः।
शरणं भव मे दुर्गे शरण्ये भक्त-वत्सले ॥ २६ ॥

एवं स्तुता हि सा देवी दर्शयामास पाण्डवम्।
उपगम्य तु राजान·मिदं वचन·मब्रवीत् ॥ २७ ॥

**देव्युवाच**

शृणु राजन् महाबाहो मदीयं वचनं प्रभो।
भविष्य·त्यचिरा·देव सङ्ग्रामे विजय·स्तव ॥ २८ ॥

मम प्रसादा·न्निर्जित्य हत्वा कौरव-वाहिनीम्।
राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः ॥ २९ ॥

भ्रातृभिः सहितो राजन् प्रीतिं प्राप्स्यसि पुष्कलाम्।
मत्-प्रसादा·च्च ते सौख्य·मारोग्यं च भविष्यति ॥ ३० ॥

ये च सङ्कीर्तयिष्यन्ति लोके विगत-कल्मषाः।
तेषां तुष्टा प्रदास्यामि राज्य·मायु·र्वपुः सुतम् ॥ ३१ ॥

प्रवासे नगरे वाऽपि सङ्ग्रामे शत्रु-सङ्कटे।
अटव्यां दुर्ग-कान्तारे सागरे गहने गिरौ ॥ ३२ ॥

ये स्मरिष्यन्ति मां राजन् यथाऽहं भवता स्मृता।
न तेषां दुर्लभं किं-चि·दस्मिन् लोके भविष्यति॥ ३३॥

इदं स्तोत्र-वरं भक्त्या शृणुयाद् वा पठेत वा।
तस्य सर्वाणि कार्याणि सिद्धिं यास्यन्ति पाण्डवाः॥ ३४॥

मत्-प्रसादा·च्च वः सर्वान् विराट-नगरे स्थितान्।
न प्रज्ञास्यन्ति कुरवो नरा वा त·न्निवासिनः॥ ३५॥

इ·त्युक्त्वा वरदा देवी युधिष्ठिर·मरिन्दमम्।
रक्षां कृत्वा च पाण्डूनां तत्रै·वान्तरधीयत॥ ३६॥

॥ इति श्रीम·न्महाभारते विराट-पर्वणि पाण्डव-प्रवेश-पर्वणि अष्टमोऽध्यायः॥

❁

# ॥ अर्जुन-कृत-दुर्गा-स्तुतिः॥

## सञ्जय उवाच

धार्तराष्ट्र-बलं दृष्ट्वा युद्धाय समुपस्थितम्।
अर्जुनस्य हिता·र्थाय कृष्णो वचन·मब्रवीत्॥ १॥

## श्री-भगवा·नुवाच

शुचि·र्भूत्वा महाबाहो सङ्ग्रामा·भिमुखे स्थितः।
पराजयाय शत्रूणां दुर्गा-स्तोत्र·मुदीरय॥ २॥

## सञ्जय उवाच

एव·मुक्तोऽर्जुनः सङ्ख्ये वासुदेवेन धीमता।
अवतीर्य रथात् पार्थः स्तोत्र·माह कृता·ञ्जलिः॥ ३॥

## अर्जुन उवाच

नम·स्ते सिद्ध-सेनानि आर्ये मन्दर-वासिनि।
कुमारि कालि कापालि कपिले कृष्ण-पिङ्गले॥ ४॥

भद्र-कालि नम·स्तुभ्यं महा-कालि नमोऽस्तु ते।
चण्डि चण्डे नम·स्तुभ्यं तारिणि वर-वर्णिनि॥५॥

कात्यायनि महा-भागे करालि विजये जये।
शिखि-पिच्छ-ध्वज-धरे नाना·भरण-भूषिते॥६॥

अट्ट-शूल-प्रहरणे खड्ग-खेटक-धारिणि।
गोपे·न्द्रस्या·नुजे ज्येष्ठे नन्द-गोप-कुलो·द्भवे॥७॥

महिषा·सृक्-प्रिये नित्यं कौशिकि पीत-वासिनि।
अट्ट-हासे कोक-मुखे नम·स्तेऽस्तु रण-प्रिये॥८॥

उमे शाकम्भरि श्वेते कृष्णे कैटभ-नाशिनि।
हिरण्या·क्षि विरूपा·क्षि सुधूम्रा·क्षि नमोऽस्तु ते॥९॥

वेद-श्रुति महा-पुण्ये ब्रह्मण्ये जात-वेदसि।
जम्बू-कटक-चैत्येषु नित्यं सन्निहिताऽलये॥१०॥

त्वं ब्रह्म-विद्या विद्यानां महा-निद्रा च देहिनाम्।
स्कन्द-मात·र्भगवति दुर्गे कान्तार-वासिनि॥११॥

स्वाहा-कारः स्वधा चैव कला काष्ठा सरस्वती।
सावित्री वेद-माता च तथा वेदा·न्त उच्यते॥१२॥

स्तुताऽसि त्वं महा-देवि विशुद्धेना·न्त·रात्मना।
जयो भवतु मे नित्यं त्वत्-प्रसादाद् रणा·जिरे॥१३॥

कान्तार-भय-दुर्गेषु भक्तानां चा·लयेषु च।
नित्यं वससि पाताले युद्धे जयसि दानवान्॥१४॥

त्वं जम्भनी मोहिनी च माया ह्रीः श्री·स्तथै·व च।
सन्ध्या प्रभावती चै·व सावित्री जननी तथा॥१५॥

तुष्टिः पुष्टि·र्धृति·र्दीप्ति·श्चन्द्रा·दित्य-विवर्धिनी।
भूति·र्भूति-मतां सङ्ख्ये वीक्ष्यसे सिद्ध-चारणैः॥१६॥

**सञ्जय उवाच**

ततः पार्थस्य विज्ञाय भक्तिं मानव-वत्सला।
अन्तरिक्ष-गतो·वाच गोविन्दस्या·ग्रतः स्थिता॥१७॥

**दे·व्युवाच**

स्वल्पेनै·व तु कालेन शत्रू·ञ्जेष्यसि पाण्डव।
नर·स्त्व·मसि दुर्धर्ष नारायण-सहाय-वान्॥१८॥

अजेय·स्त्वं रणेऽरीणा·मपि वज्र-भृतः स्वयम्।
इ·त्येव·मुक्त्वा वरदा क्षणेना·न्तरधीयत॥१९॥

लब्ध्वा वरं तु कौन्तेयो मेने विजय·मात्मनः।
आरुरोह ततः पार्थो रथं परम-सम्मतम्॥२०॥

कृष्णा·र्जुना·वेक-रथौ दिव्यौ शङ्खौ प्रदध्मतुः।
य इदं पठते स्तोत्रं कल्य उत्थाय मानवः॥२१॥

यक्ष-रक्षः-पिशाचेभ्यो न भयं विद्यते सदा।
न चा·पि रिपव·स्तेभ्यः सर्पा·द्या ये च दंष्ट्रिणः॥२२॥

न भयं विद्यते तस्य सदा राज-कुला·दपि।
विवादे जय·माप्नोति बद्धो मुच्यति बन्धनात्॥२३॥

दुर्गं तरति चा·वश्यं तथा चोरै·र्विमुच्यते।
सङ्ग्रामे विजये·न्नित्यं लक्ष्मीं प्राप्नोति केवलाम्॥२४॥

आरोग्य-बल-सम्पन्नो जीवेद् वर्ष-शतं तथा।
एतद् दृष्टं प्रसादात् तु मया व्यासस्य धीमतः॥२५॥

यत्र धर्मो द्युतिः कान्ति·र्यत्र ह्रीः श्री·स्तथा मतिः।
यतो धर्म·स्ततः कृष्णो यतः कृष्ण·स्ततो जयः॥२६॥

॥इति श्रीम·न्महाभारते भीष्म-पर्वणि श्रीमद्-भगवद्गीता-पर्वणि त्रयोविंशोऽध्यायः॥

❁

# ॥ दुर्गा-चन्द्र-कला-स्तुतिः ॥

वेधो·हरी·श्वर-स्तुत्यां विहर्त्रीं विन्ध्य-भूधरे।
हर-प्राणे·श्वरीं वन्दे हन्त्रीं विबुध-विद्विषाम्॥ १ ॥

अभ्यर्थनेन सरसीरुह-सम्भवस्य
त्यक्त्वो·दिता भगव·दक्षि-पिधान-लीलाम्।
विश्वेश्वरी विप·दपाकरणे पुरस्तात्
माता ममा·स्तु मधु-कैटभयो·र्निहन्त्री॥ २ ॥

प्रा·ङ्निर्जरेषु निहितै·र्निज-शक्ति-लेशैः
एकीभवद्भि·रुदिताऽखिल-लोक-गुप्त्यै ।
सम्पन्न-शस्त्र-निकरा च त·दायुध-स्थैः
माता ममा·स्तु महिषा·न्त-करी पुरस्तात्॥ ३ ॥

प्रालेय-शैल-तनया-तनु-कान्ति-सम्पत्-
कोशो·दिता कुवलय-च्छवि-चारु-देहा।
नारायणी नम·दभीप्सित-कल्प-वल्ली
सुप्रीति·मावहतु शुम्भ-निशुम्भ-हन्त्री॥ ४॥

विश्वे·श्वरी·ति महिषा·न्त-करी·ति यस्याः
नारायणी·त्यपि च नामभि·रङ्कितानि।
सूक्तानि पङ्कज-भुवा च सुरर्षिभि·श्च
दृष्टानि पावक-मुखै·श्च शिवां भजे ताम्॥ ५॥

उत्पत्ति-दैत्य-हनन-स्तवना·त्मकानि
संरक्षका·ण्यखिल-भूत-हिताय यस्याः।
सूक्ता·न्यशेष-निगमा·न्त-विदः पठन्ति
तां विश्व-मातर·मजस्र·मभिष्टवीमि॥ ६ ॥

ये वैप्रचित्त-पुन·रुत्थित-शुम्भ-मुख्यैः
दुर्भिक्ष-घोर-समयेन च कारितासु।
आविष्कृता·स्त्रि-जग·दार्तिषु रूप-भेदाः
तै·रम्बिका समभिरक्षतु मां विपद्भ्यः॥७॥

सूक्तं यदीय·मरविन्द-भवा·दि-दृष्टम्
आवर्त्य दे·व्यनुपदं सुरथः समाधिः।
द्वा·व·प्यवापतु·रभीष्ट-मनन्य-लभ्यं
ता·मादि-देव-तरुणीं प्रणमामि मूर्ध्ना॥८॥

माहिष्मती-तनु-भवं च रुरुं च हन्तुम्
आविष्कृतै·र्निज-रसा·दवतार-भेदैः ।
अष्टादशा·हत-नवा·हत-कोटि-सङ्ख्यैः
अम्बा सदा समभिरक्षतु मां विपद्भ्यः॥९॥

एत·च्चरित्र·मखिलं लिखितं हि यस्याः
सम्पूजितं सदन एव निवेशितं वा।
दुर्गं च तारयति दुस्तर·म·प्यशेषं
श्रेयः प्रयच्छति च सर्व·मुमां भजे ताम्॥१०॥

यत्-पूजन-स्तुति-नमस्कृतिभि·र्भवन्ति
प्रीताः पितामह-रमेश-हरा·स्त्रयोऽपि।
तेषा·मपि स्वक-गुणै·र्ददती वपूंषि
ता·मीश्वरस्य तरुणीं शरणं प्रपद्ये॥११॥
कान्तार-मध्य-दृढ-लग्नतयाऽवसन्नाः
मग्ना·श्च वारिधि-जले रिपुभि·श्च रुद्धाः।
यस्याः प्रपद्य चरणौ विपद·स्तरन्ति
सा मे सदाऽस्तु हृदि सर्व-जगत्-सवित्री॥१२॥

बन्धे वधे महति मृत्यु-भये प्रसक्ते
वित्त-क्षये च विविधे च महो·पतापे।
यत्-पाद-पूजन·मिह प्रतिकार·माहुः
सा मे समस्त-जननी शरणं भवानी॥१३॥

बाणा·सुर-प्रहित-पन्नग-बन्ध-मोक्षः
तद्-बाहु-दर्प-दलना·दुषया च योगः।
प्राद्युम्निना द्रुत·मलभ्यत यत्-प्रसादात्
सा मे शिवा सकल·म·प्यशुभं क्षिणोतु॥ १४॥

पापः पुलस्त्य-तनयः पुन·रुत्थितो माम्
अद्या·पि हर्तु·मय·मागत इ·त्युदीतम्।
यत्-सेवनेन भय·मिन्दिरयाऽवधूतं
ता·मादि-देव-तरुणीं शरणं गतोऽस्मि॥ १५॥

यद्-ध्यान-जं सुख·मवाप्य·मनन्त-पुण्यैः
साक्षात् त·मच्युत-परिग्रह·मा·श्ववापुः।
गोपा·ङ्गनाः किल य·दर्चन-पुण्य-मात्राः
सा मे सदा भगवती भवतु प्रसन्ना॥ १६॥

रात्रिं प्रपद्य इति मन्त्र-विदः प्रपन्नान्
उद्बोध्य मृ·त्यवधि·मन्य-फलैः प्रलोभ्य।
बुद्ध्वा च तद्-विमुखतां प्रतनं नयन्तीम्
आकाश·मादि-जननीं जगतां भजे ताम्॥ १७॥

देश-कालेषु दुष्टेषु दुर्गा-चन्द्र-कला-स्तुतिः।
सन्ध्ययो·रनुसन्धेया सर्वा·पद्-विनिवृत्तये॥ १८॥

॥ इति श्रीम·दप्पय्य-दीक्षिते·न्द्र-विरचिता दुर्गा-चन्द्र-कला-स्तुतिः सम्पूर्णा॥

# ॥ दुर्गा-पञ्च-रत्नम्॥

ते ध्यान-योगा·नुगता अपश्यन्
त्वा·मेव देवीं स्व-गुणै·र्निगूढाम्।
त्व·मेव शक्तिः परमे·श्वरस्य
मां पाहि सर्वे·श्वरि मोक्ष-दात्रि॥ १॥

देवा·त्म-शक्तिः श्रुति-वाक्य-गीता
महर्षि-लोकस्य पुरः प्रसन्ना।
गुहा परं व्योम सतः प्रतिष्ठा
मां पाहि सर्वे·श्वरि मोक्ष-दात्रि॥ २॥

पराऽस्य शक्ति·र्विविधै·व श्रूयसे
श्वेताश्व-वाक्यो·दित-देवि दुर्गे।
स्वाभाविकी ज्ञान-बल-क्रिया ते
मां पाहि सर्वे·श्वरि मोक्ष-दात्रि॥ ३॥

देवा·त्म-शब्देन शिवा·त्म-भूता
यत् कूर्म-वायव्य-वचो·विवृत्या।
त्वं पाश-विच्छेद-करी प्रसिद्धा
मां पाहि सर्वे·श्वरि मोक्ष-दात्रि॥ ४॥

त्वं ब्रह्म-पुच्छा विविधा मयूरी
ब्रह्म-प्रतिष्ठाऽ·स्युपदिष्ट-गीता।
ज्ञान-स्वरूपा·त्मतयाऽखिलानां
मां पाहि सर्वे·श्वरि मोक्ष-दात्रि॥ ५॥

॥ इति श्री-काञ्ची-कामकोटि-मूलाम्नाय-सर्वज्ञ-पीठा·धीश्वरैः
श्रीम·न्महादेवे·न्द्र-सरस्वती-श्रीचरणा·न्तेवासि-वर्यैः
श्रीम·च्चन्द्रशेखरे·न्द्र-सरस्वतीभिः विरचितं दुर्गा-पञ्च-रत्नम् ॥

❁

कायेन वाचा मनसे·न्द्रियै·र्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद् यत् सकलं परस्मै
नारायणाये·ति समर्पयामि॥

❁❁❁